॥ शीतलाष्टकं ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ शीतलाष्टकमं प्रारभ्यये ॥

अस्य श्रीशीतलास्तोत्रस्य महादेव ऋषिः अनुष्टुप् छन्दः शीतला देवता लक्ष्मीर्बीजम् भवानी शक्तिः सर्वाविस्फोटकनिवृत्तये जपे विनियोगः ॥

ईश्वर उवाच ---

वन्देऽहं शीतलां देवीं रासभस्थां दिगम्बरम् ।
मार्जनीकलशोपेतामं शूर्पालंकृतमस्तकाम् ॥ १ ॥
वन्देऽहं शीतलां देवीं सर्वरोगभयापहाम्।
यामासाद्य निवर्तेत विस्फोटकभयं महत् ॥ २ ॥
शीतले शितले चेति यो ब्रूयद्दाहपीडितः ।
विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति ॥ ३ ॥
यस्त्वामुद्कमध्ये तु धृत्वा पूजयते नरः ।
विस्फोटकभयं घोरं गृहे तस्य न जायते ॥ ४ ॥
शीतले ज्वरदग्धस्य पूतिगन्धयुतस्य च
प्रणष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौष्धम् ॥ ५ ॥
शीतले तनुजान्रोगान् नृणां हरसि दुस्त्यजान् ।
विस्फोटकविदिर्णानां त्वमेकाऽमृतवर्षिणी ॥ ६ ॥
गलगण्डग्रह्या रोगा ये चान्ये दारुणा नृणाम् ।
त्वदनुध्यानमात्रेण शीतले यान्ति संक्षयम् ॥ ७ ॥
न मन्त्रो नौषधं तस्य पापरोगस्य विद्यते ।
त्वामेकां शीतले धात्रीं नान्यां पश्यामि देवताम् ॥ ८ ॥
मृणालतन्तुसदृशीं नाभिह्वन्म यसंस्थिताम् ।
तस्त्वामं साञ्चिन्तयेदेवि तस्य मृत्युर्न जायते ॥ ९ ॥
अष्टकं क्षीतलादेव्या यो नरः प्रपठेसदा ।
विस्फोटकभयं घोरं गृहे तस्य न जायते ॥ १० ॥
श्रोतव्यं पठितव्यं च श्रद्धाभाक्तिसमन्वितैः ।

उपसर्गविनाशाय परमं स्वस्त्ययनं महत् ॥ ११ ॥
शीतले त्वं जगन्माता शीतले त्वं जगत्पिता ।
शीतले त्वं जगद्धात्री शितलायै नमो नमः ॥ १२ ॥
रासभो गर्द्दभश्चैव खरोवैशाखनन्दनः ।
शीतलावाहनश्चैव दूर्वाकन्दनिकृन्तनः ॥ १३ ॥
एतानि खरनामानि शीतलाग्रे तु यः पठेत् ।
तस्य गेहे शिशूनां च शीतलारुङ्ग जायते ॥ १४ ॥
शीतलाष्टकमेवेदं न देयं यस्यकस्यचित् ।
दातव्यं न सदा तस्मै श्रद्धाभक्तियुताय वै ॥ १५ ॥

॥ इति श्रीस्कन्दपुराणे शीतलाष्टकं समाप्तम् ॥

Please send corrections to Mike Magee (ac70@cityscape.co.uk)
Last updated December 21, 1997